दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-204 | 1 | मई 17, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लप्रतिपदा
ज्येष्ठ 03 प्रविष्ठांशः मङ्गलमयः भवेत्

2 प्राकृतिक-कृषिः हिमाचलस्य नूतना शक्तिः, प्रकृतेः सत्यमित्राणि अभवन् २.२३ लक्षं कृषकाः

3 अन्ताराष्ट्रिय-सङ्कटस्य मूल्यवृद्धेः च प्रहारेण हिमाचलप्रदेशः सम्पीडितः - विक्रमादित्यसिंहः

4 भारतस्य विभाजनस्य विषये अस्माकं मध्ये कतिजनाः जानन्ति?

## भारत-नीदरलैंड्स्-देशौ विश्वव्यापि समाह्वानानां निवारणाय मिलित्वा कार्यं कुर्वन्तौ



प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारत-नीदरलैंड्स्-देशौ विश्वव्यापि समाह्वानानां निवारणाय विश्वसनीयं, पारदर्शकं, भविष्यस्य कृते आपूर्तिशृङ्खलायाः निर्माणार्थं मिलित्वा कार्य कुर्वन्तौ स्तः, यत् सः बहुविधसङ्कटैः ग्रस्तं आपद्-दशकम् इति वर्णितवान्। नीदरलैण्ड्-देशस्य हेग्-नगरे स्वस्य पञ्चदेशानां यात्रायाः क्रमे सामुदायिक कार्यक्रमं सम्बोधयन् प्रधानमन्त्री श्रीमोदी अवदत् यत् विश्वं कोविड्-19 महामार्या, वर्तमान-संघर्षेण, उद्भूत-ऊर्जा-सङ्कटं चेत्यादीनां अभूतपूर्वप्रतिसन्धिं सम्मुखीकरोति । सः सावधानम् अकरोत् यत् एतेषां समाह्वानानां द्रुतगत्या निराकरणे विफलतया वैश्विकविकास-लाभः व्यतिक्रमितः भविष्यति तथा च जनसङ्ख्यायाः विशालः भागः निर्धनतायां निमग्नः भविष्यति। आर्थिक स्थिति व्यवस्थायाः सुदृढीकरणाय वैश्विकप्रयासान् प्रकाशयन् प्रधानमन्त्री अवदत् यत् भारत-नीदरलैंड्स्-देशौ संयुक्तरूपेण सुदृढ आपूर्तिशृङ्खलायाः निर्माणे केन्द्रितौ स्तः। प्रधानमन्त्री नरेन्द्रमोदी नीदरलैण्डदेशस्य प्रधानमन्त्रिणा रॉब् जेटेन इत्यनेन सह द्विपक्षीयवार्ता करिष्यति। सः अद्य मध्यान्हे हेग-नगरे राजा विलियम-अलेक्जेण्डर तथा महारानी मैक्सिमा इत्येताभ्यां सह मिलितवान्। एषा यात्रा द्विपक्षीयसम्बन्धेभ्यः अधिकमहत्त्वपूर्णा अस्ति । सम्प्रति सम्पन्नस्य भारत-यूरोपीय-मुक्तव्यापार-संधेः अनन्तरं भारत-यूरोपीय-सम्बन्धानां व्यापक-विस्तारस्य अपेक्षा अस्ति। नीदरलैण्डदेशस्य यात्रायाः अनन्तरं प्रधानमन्त्री श्री मोदी अद्य स्वस्य यात्रायाः तृतीयचरणस्य अन्तर्गतं स्वीडेनदेशस्य यात्रां करिष्यति।

## इराक् देशस्य प्रधानमन्त्री अली फलीह कदीम अल-जैदी इत्यस्मै अभिनन्दिवान् प्रधानमन्त्री मोदी



प्रधानमन्त्री नरेन्द्रमोदी इराक् देशस्य प्रधानमन्त्री पदस्य कार्यभार ग्रहणाय अली फलीह कदीम अल-जैदी इत्यस्मै अभिनन्दिवान्। सामाजिकान्तर्जालीये पटले श्रीमोदी अवदत् यत्, इराक-देशेन सह दीर्घकालिक-मैत्रीपूर्ण-सम्बन्धान्भारतम् अत्यन्तं महत्त्वं ददति तथा च सर्वेषु क्षेत्रेषु द्वैपाक्षिक-सम्बन्धान् इतोप्यधिकं सुदृढीकर्तुं दृढतया प्रतिबद्धः अस्ति। उभयोः राष्ट्रयोः संयुक्तप्रगत्यै समृद्ध्यै च संयुक्तरूपेण कार्यं कर्तुं उत्सुकः अस्मि इति प्रधानमन्त्री अवदत्।

## पाकिस्तानः भूगोलस्य भागः भवितुम् इच्छति उत वा इतिहासस्य- सेनाध्यक्षः



सेनाध्यक्षेण जनरल उपेन्द्र द्विवेदिना पाकिस्तानं भयोत्पादकेभ्यः आश्रयं दातुं, भारतस्य विरुद्धं कार्याचरणाय च सावधानम् कृतम्। नवदिल्ल्यां आयोजिते "सेना संवाद" कार्यक्रमे भाषमाणः श्रीद्विवेदी अवदत् यत् यदि पाकिस्तानः भारतस्य विरुद्धम् एतादृशाः गतिविधयः निरन्तरं करोति, तर्हि तेन एतत् निश्चयं कर्तव्यं यत् सः भूगोलस्य भागः भवितुम् इच्छति उत वा इतिहासस्य।

## थाईलैण्ड्-ओपन्-बैडमिण्टन्-क्रीडायां भारतीयपुरुषयुगलं अन्तिम स्पर्धायां प्रविष्टम्

थाईलैण्ड्-ओपन्-बैडमिण्टन्-क्रीडायां, बैंकाक-नगरे उपांत्यचक्रीय-क्रीडायां मलेशिया-देशस्य गोह-से-फेई तथा नूर-इज्जुद्दीन् इत्यमुं च पराजित्य, सात्विक साईं राज-रङ्किरेड्डी तथा चिराग्-शेट्टी इत्येतयोः भारतीयपुरुषयुगलं अन्तिम स्पर्धायां प्रविष्टम्।

## ये छात्राः स्वस्य परिणामैः असन्तुष्टाः सन्ति ते संरचित-समीक्षा-व्यवस्थां प्राप्तुं शक्नुवन्ति-सी. बी. एस्. ई.

केन्द्रीय-माध्यमिक शिक्षा-परिषद सी. बी. एस्. ई. इत्ययम् अवदत् यत् ये छात्राः स्वस्य परिणामैः असन्तुष्टाः सन्ति ते संरचित-समीक्षा-व्यवस्थां प्राप्तुं शक्नुवन्ति या हि द्वि-चरणीय-समीक्षा प्रक्रिया अस्ति। प्रथमचरणे छात्राः स्वमूल्यांकितानां उत्तरपुस्तिकानां स्कैन इति प्रतिविम्बित-प्रतयः याचयितुं शक्नुवन्ति । एताः अन्तर्जालीय-माध्यमेन उपलभ्यन्ते। द्वितीयचरणे छात्राः विसङ्गतानां प्रश्नोत्तराणां सत्यापनाय आवेदनं कर्तुं शक्नुवन्ति उत वा अङ्कन-योजनायाः आधारेण विशिष्टानां उत्तराणां पुनर्मूल्याङ्कनार्थं याचनां कर्तुं शक्नुवन्ति । सी.बी.एस्.ई. इत्यनेन सूचितं यत् छात्राः अस्य मासस्य नवदश दिनाङ्कात् द्वाविंशतिः दिनाङ्कपर्यन्तं प्रतिविषयाय सप्तशतरूप्यकाणां शुल्केन मूल्यांकितानां उत्तरपुस्तिकानां प्रतिविम्बितप्रतिलिपिं प्राप्तुं अन्तर्जालीय-माध्यमेन आवेदनं कर्तुं शक्नुवन्ति ।

## पश्चिम बंगाल प्रशासनेन सर्वेषां जातिप्रमाणपत्राणां पुनः सत्यापनस्य आदेशः प्रदत्तः

पश्चिम बंगाल प्रशासनेन सर्वेषां जातिप्रमाणपत्राणां पुनः सत्यापनस्य आदेशः प्रदत्तः । एकादशाधिक द्विसहस्रतमवर्षात् निर्गतानां प्रमाणपत्राणां विषये अधिकारिणः उक्तवन्तः यत् गतचतुर्दशवर्षेषु एतेषां प्रमाणपत्राणां प्रामाणिकतायाः वैधतायाः च विषये प्रश्नाः उत्थापिताः सन्ति। शासकीय-अभिलेखानुसारम् उक्तकालावधौ अनुसूचितजातीनां, अनुसूचितजनजातीनां तथा अन्यपश्चवर्ती वर्गाणां कृते प्रायः एकोनसप्ततिलक्षाधिकैकशतकोटि जातिप्रमाणपत्राणि निर्गतानि सन्ति। अधुना उपजनपदाधिकारीणः जनपदस्तरीय अधिकारीणश्च प्रत्येकं प्रमाणपत्रं सूक्ष्मतया परीक्षणं करिष्यन्ति।

## सुभाषितम्

**अमृतं चैव मृत्युश्च,**
**द्वयं देहप्रतिष्ठितम्।**
**मोहादापद्यते मृत्युः,**
**सत्येनापद्यतेऽमृतम्।।**

भावार्थः- अमरता और मृत्यु दोनों ही हमारे शरीर मे साथ में निवास करते हैं, बस मोह के कारण मृत्यु आती है और सत्य के कारण अमरत्व की प्राप्ति होती है।




## आगामि-दिन-द्वयोः अतिवृष्टेः पूर्वानुमानं कृतम्

भारतीय ऋतु विज्ञान विभागेन आगामि-दिन-द्वयोः अण्डमान-निकोबार-द्वीपसमूहेषु, उपहिमालयीय-पश्चिमबङ्गे, सिक्किम राज्ये, असमे, मेघालये तथा दक्षिणकर्नाटके अतिवृष्टेः पूर्वानुमानं कृतम्। अनेन विभागानुसारेण अद्य अरुणाचलप्रदेश, केरल, माहे, तमिळनाडु, पुदुच्चेरी तथा कराईकल चेत्येतेषु क्षेत्रेषु अपि एतादृशी एव स्थितिः भविष्यति। विभागेन उक्तं यत् बिहार-राज्ये, आन्ध्रप्रदेशे, छत्तीसगढ राज्ये, पूर्वीराजस्थाने, झारखण्डे, लक्षद्वीपे, मध्यमहाराष्ट्र, मराठवाडायां जम्मू-कश्मीर-प्रदेशे, लद्दाखे तथा देशस्य उत्तरपूर्वीयभागेषु च अद्य गर्जनेन, तीव्रवातैश्च सह झञ्झावातस्य सम्भावना विद्यते। विभागेन झारखण्डे, मध्यप्रदेशे तथा राजस्थानस्य केषुचित् स्थानेषु उष्णतरङ्गस्य स्थितेः अपि घोषणा कृता।

# प्राकृतिक-कृषिः हिमाचलस्य नूतना शक्तिः, प्रकृतेः सत्यमित्राणि अभवन् २.२३ लक्षं कृषकाः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे प्राकृतिक-कृषिः अधुना केवलं कृषेः पद्धतिः एव न, अपि तु ग्रामीण-अर्थव्यवस्थां सुदृढीकर्तुं महान् जनान्दोलनं सञ्जायमानम् अस्ति। राज्यसर्वकारस्य महत्त्वाकाङ्क्षिण्याः 'राजीवगान्धी- प्राकृतिक- कृषि- खुशहाल- कृषक- योजनायाः' अन्तर्गतम् अस्मिन् वर्षे प्रदेशस्य प्रायः ६३ सहस्र- कृषकेभ्यः प्राकृतिकोत्पादस्य क्रयणस्य लक्ष्यं निर्धारितं वर्तते।न्यूनतम- समर्थन- मूल्यस्य प्रत्याभूतिं प्राप्य कृषकाणां प्रवृत्तिः वेगेन प्राकृतिक-कृषिं प्रति वर्धिता। हिमाचलप्रदेशः देशस्य प्रथमं राज्यम् अभवत्, येन प्राकृतिक-कृष्या उत्पादित-शस्यानां कृते न्यूनतम-समर्थन- मूल्यं निश्चितं कृतम्। सर्वकारः अस्मिन् वर्षे प्राकृतिक-गोधूमं ८० रूप्यकाणि, मक्काधान्यं ५० रूप्यकाणि, आर्द्रहरिद्रां १५० रूप्यकाणि, पाङ्गीक्षेत्रस्य यवं ८० रूप्यकाणि, आर्द्रकं च ३० रूप्यकाणि प्रति किलोग्राम दरेण क्रीणाति। अनेन कृषकाः विपण्याः अनिश्चिततायाः साहाय्यं प्राप्तवन्तः, ग्रामेषु च नूतना आर्थिक- आशा उदिता। प्रदेशे अधुना यावत् २.२३ लक्षतः अधिकाः कृषकाः उद्यानपालाश्च पूर्णरूपेण आंशिकरूपेण वा प्राकृतिककृषिं स्वीकृतवन्तः। एषः अभियानः प्रदेशस्य ९९.३ प्रतिशतं ग्रामपञ्चायतेषु प्राप्तः अस्ति। कृषिविभागेन अस्मिन् वर्षे एक-लक्षं नूतन- कृषकान् 'हिम-परिवार-पञ्जिका' इत्यनेन सह योजयितुं लक्ष्यं स्थापितं, येषु अधुना यावत् ७० सहस्रतः अधिकाः कृषकाः पञ्जीकृताः अभवन्। सर्वकारानुसारम् अधुना यावत् ७,३८२ कृषकेभ्यः ११,३२९ क्विण्टल परिमितः प्राकृतिकोत्पादः क्रीतः, यस्य प्रतिफलरूपेण कृषकाणां वित्तकोष-क्रमांकेषु साक्षात् ६.४० कोटि- रूप्यकाणि स्थानान्तरितानि। प्राकृतिक- गोधूमस्य क्रयणे अपि महती वृद्धिः दृष्टा। गते वर्षे यत्र ८३८ कृषकेभ्यः क्रयणं जातं आसीत्, तत्रैव अस्मिन् वर्षे एषा सङ्ख्या २,०२२ पर्यन्तं प्राप्ता।

## सर्वकारेण लाभान्वितानां सङ्ख्यां वर्धयितुं दत्ताः निर्देशाः

मुख्यमन्त्रिणा सुक्खुमहोदयेन अधिकारिणः आगामिवर्षेषु 'एमएसपी' लाभान्वितां सङ्ख्यां वर्धयितुं निर्दिष्टाः। सर्वकारस्य उद्देश्यं वर्तते यत् ग्रामस्य पूँजी ग्रामस्यैव अर्थव्यवस्थायां तिष्ठेत्, कृषकेभ्यः च स्थायी-आयस्य स्रोतः उपलब्धः भवेत्। राज्यसर्वकारः प्राकृतिक-उत्पादानां मूल्यसंवर्धने, विपणने च विशेषं बलं ददाति। गते वर्षे क्रीतेभ्यः प्राकृतिक-उत्पादेभ्यः ४२० क्विण्टल गोधूमचूर्णं (आटा), १,३७० क्विण्टल दलियाखाद्यं, १,६२८ क्विण्टल मक्का-चूर्णं तथा ५९ क्विण्टल् यव-चूर्णं सज्जीकृत्य विपण्यां प्रेषितम्।

## प्राकृतिककृषिः कृषकाणां कृते लाभप्रदा-

जलवायु-परिवर्तनस्य, वर्धमान-कृषि-व्ययस्य, न्यूनीभवन्त्याः मृत्तिकायाः उर्वराशक्तेः तथा वन्यपशुभ्यः शस्यानां जायमानस्य हानिस्य मध्ये प्राकृतिक- कृषिः कृषकाणां कृते लाभप्रदः स्थायी च विकल्पः रूपेण उदिता अस्ति। सर्वकारस्य एषः उपक्रमः अधुना ग्रामीण-हिमाचले आर्थिक- परिवर्तनस्य नूतनां कथां लिखन् दृश्यते।

# हिमाचलप्रदेशे तापक्रमः वर्धिष्यते, आगामीनि पञ्चदिनानि यावत् वातावरणं मेघमुक्तं (स्वच्छं) भविष्यति



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे आगामीदिनेषु तापमानवृद्धेः सम्भावना वर्तते। मौसमविभागस्य अनुसारं आगामिषु ४-५ दिनेषु राज्यस्य अनेकेषु भागेषु न्यूनतम- तापमाने क्रमशः २-३ डिग्री- परिमितवृद्धिः सम्भाव्यते। तथैव अनेकेषु स्थानेषु अधिकतम- तापमाने अपि २-५ डिग्री सेल्सियस- परिमिता वृद्धिः भविष्यति इति अनुमानम्। अद्य शिमला- राजधान्यां तद्समीपवर्तिषु च प्रदेशेषु प्रखरः सूर्यप्रकाशः दृश्यते।

## द्वयोः दिनयोः केषुचित् भागेषु वर्षायाः सम्भावना-

मौसमविज्ञानकेन्द्रस्य शिमला अनुसारं १६, १७, २२ मई दिनाङ्केषु राज्यस्य मध्यवर्तीषु उच्चपर्वतीयेषु च केषुचित् पृथक् स्थानेषु लघुवृष्टेः सम्भावना वर्तते। १८तः २१ मई पर्यन्तं सम्पूर्णे प्रदेशे मौसमः शुष्कः भविष्यति इति पूर्वानुमानम्। १६ तथा १७ मई दिनयोः चम्बा, कांगड़ा, कुल्लू, किन्नौर, लाहौल एण्ड स्पीति-प्रदेशेषु च प्रतिघण्टा ३०-४० किलोमीटरवेगेन अन्धवातस्य प्रवाहः सम्भाव्यते इति पीत-सावधानता घोषितम्। गत २४-होरासु सराहनक्षेत्रे १५.०, सांगलाक्षेत्रे ३.६, भाभानगरे २.०, कल्पाक्षेत्रे च ०.९ मिलीमीटर वृष्टिः अभिलेखिता।

## कुत्र कियत् न्यूनतम-तापमानम्-

पौण्टा साहिबनगरे शुक्रवासरे अधिकतम-तापमानं ३८.० डिग्री सेल्सियस् अभिलेखितम्। गत-रात्रौ शिमलानगरे १५.८, सुंदरनगरनगरे १७.०, भुन्तरे १३.५, कल्पाप्रदेशे ६.०, धर्मशालानगरे १०.९, ऊनानगरे १९.५, केलाँगप्रदेशे ३.५, पालमपुरे १५.५, सोलननगरे १५.०, मनालीनगरे १०.२, कांगड़ाप्रदेशे १८.२, मंडीनगरे १८.५, बिलासपुरे २०.०, चम्बाप्रदेशे १५.२, डलहौजीप्रदेशे १६.६, जुब्बड़हट्टीप्रदेशे १७.५, कुफरीप्रदेशे १०.२, कुकुमसेरीप्रदेशे ५.७, सेऊबागप्रदेशे ११.४, बरठींप्रदेशे १६.९, पौंटा साहिबनगरे २५.०, सराहनप्रदेशे ११.०, देहरागोपीपुरे २१.०, ताबोप्रदेशे च ३.२ डिग्री सेल्सियस न्यूनतम-तापमानम् अभिलेखितम्।

# हृद्रोग-शल्यक्रियानन्तरं रुग्णाः लप्स्यन्ते 'सुपर-कूलिङ्ग' इति सुरक्षां, जटिलावस्थानां रोधने मिलिष्यति साहाय्यम्




**हिमसंस्कृतवार्ताः - बिलासपुरम्।** एम्स-बिलासपुर-संस्थाने अधुना हृदयस्य गम्भीर-रुग्णानां जटिलां शल्यक्रियां च कारयितत्वृणां जनानां कृते अत्याधुनिक-'थैराप्यूटिक हाइपो हाइपरथर्मिया तन्त्रस्य' (Therapeutic Hypo-Hyperthermia System) सुविधा उपलप्स्यते। एषा तकनीक-प्रणाली विशेषरूपेण हृदय-शल्यक्रियायाः 'आईसीयू' (ICU) मध्ये प्रविष्टाणां गम्भीर-रुग्णानां सुरक्षित-स्वास्थ्यलाभाय (Recovery) उपयोक्ष्यते। संस्थानेन अस्याः उच्च-तान्त्रिक-प्रणाल्याः (High-tech system) क्रयण-प्रक्रिया प्रारब्धा। एम्स-बिलास्पुरे एषा सुविधा आरब्धे सति प्रदेशस्य रुग्णानां प्रगत-तापीय-प्रबन्धन-प्रविधेः (Advanced Thermal Management) कृते चण्डीगढ़-दिल्ली-सदृशानां बृहत्-चिकित्सा-संस्थानां प्रति गमनं न्यूनं भविष्यति। विशेषाज्ञानां मते एषा प्रणाली हृदयस्य जटिलायाः शल्यक्रियायाः अनन्तरं रुग्णान् स्थिरान् स्थापयितुम् तथा मस्तिष्काघात-सदृशानां (Brain damage) गम्भीराणां जटिलावस्थानां रोधने प्रमुखां भूमिकां निर्वहति। एषा प्रणाली मुख्यरूपेण 'कार्डियोथोरेसिक एण्ड वैस्कुलर सर्जरी' (CTVS) विभागाय क्रीयते।अस्मिन्नेव विभागे 'ओपन हार्ट सर्जरी', 'बायपास सर्जरी', 'वाल्व रिप्लेसमेंट' तथा वक्षःस्थलेन सम्बद्धाः जटिलाः शल्यक्रियाः क्रियन्ते। विशेषाज्ञाः कथयन्ति यत् बहुवारं हृदय-शल्यक्रिया-काले रुग्णस्य शरीरस्य तापमानं नियन्त्रित-स्तरं यावत् न्यूनीकरणीयं भवति, येन शरीरस्य प्रमुखाङ्गेषु भारः न्यूनः भवेत् शल्यक्रिया च सुरक्षिततरूपेण पूर्णा स्यात्। एतद् यन्त्रं शरीरस्य तापमानम् अत्यन्तं शुद्धतया नियन्त्रयति, येन शल्यक्रिया-काले तदनन्तरं च सङ्कटस्य आशङ्का न्यूनीभवति। हृदयस्य बृहत्-शल्यक्रियायाः अनन्तरं रुग्णाः प्रायः तीव्रज्वरं, शरीरस्य तापमाने अस्थिरताम् तथा सङ्क्रमणं (Infection) सदृशीनां समस्यानां सम्मुखीकरणं कुर्वन्ति। एषा प्रणाली रुग्णस्य शरीरं स्थिरे तापे स्थापयितुं साहाय्यं करिष्यति, येन स्वास्थ्यलाभ-प्रक्रिया उत्तरा सुरक्षिता च भवितुं शक्ष्यति। 'कार्डियक अरेस्ट' अथवा हृदयाघातस्य (Heart attack) अनन्तरं यदा मस्तिष्कं प्रति प्राणवायु-आपूर्तिः (Oxygen supply) बाधिता भवति, तदा एषा प्रविधिः शरीरं नियन्त्रिते तापे स्थापयित्वा मस्तिष्क-कोशिकानां क्षतिं रोद्धुं सहायिका भवति। अस्मादेव कारणात् एषा आधुनिक-गम्भीर-चिकित्सा-विज्ञानस्य (Critical Care Medicine) प्रमुखासु तकनीक-प्रणालीषु गन्यते। एषा प्रणाली 'आईसीयू' मध्ये प्रवेश-जातानां गम्भीर-रुग्णाम् उपचारे अपि प्रमुखा सिद्धा भविष्यति। 'सेप्सिस' अथवा तीव्रातितीव्र-सङ्क्रमण-कारणेन आगतस्य तीव्रज्वरस्य नियन्त्रणे अपि अस्य उपयोगः करिष्यति। बहुवारं औषधैः तापमानं नियन्त्रितं न भवति, ईदृश्यां स्थितौ एतद् यन्त्रं शरीरम् आवश्यक-तापमाने स्थापयति।

# अन्ताराष्ट्रिय-सङ्कटस्य मूल्यवृद्धेः च प्रहारेण हिमाचलप्रदेशः सम्पीडितः - विक्रमादित्यसिंहः

**हिमसंस्कृतवार्ताः - शिमला।** लोकनिर्माणमन्त्रिणा विक्रमादित्यसिंहेन केन्द्रस्य नीतिषु, वर्धमानायां मूल्यवृद्धौ, अन्ताराष्ट्रिय-परिस्थितिषु तथा हिमालचले जायमानेषु आर्थिकप्रभावेषु गम्भीरा चिन्ता प्रकटीकृता। तेन उक्तं यत् वर्तमाना स्थितिः भारतस्य अन्ताराष्ट्रिय-नीतेः विफलतां अपि संसूचयति, अस्य च साक्षात् प्रभावः सामान्यजनानां जीवने दृश्यते। विक्रमादित्यसिंहः शनिवासरे शिमलायां वार्ताहरैः सह भाषते स्म। तेन उक्तं यत् एतत् पूर्वमेव स्पष्टम् आसीत् यत् पश्चिमबङ्गाल-असम-तमिलनाडु-केरल-राज्येषु निर्वाचनानां कारणात् तैल-मूल्यानि (पेट्रोल-डीजल) न वर्धितानि आसन्, किन्तु अधुना निर्वाचने समाप्ते सति मूल्येषु वृद्धिः कृता। अनेन सर्वाधिकं हानिः हिमाचल-सदृशस्य पर्यटन-आधारित-राज्यानां जायते।

तेन उक्तं यत् किञ्चित्कालपूर्वमेव वाणिज्यिक-एलपीजी-गोलकानां (Commercial LPG) मूल्यानि प्रायः द्विगुणितानि कृतानि, येन उपाहारगृहाणि (होटल-रेस्टोरेण्ट्) भोजनशालाः (ढाबा) च पूर्वमेव प्रभावे आसन्। विक्रमादित्यसिंहेन उक्तं यत् हिमालचले पर्यटन-ऋतोः (Tourism season) एषः सर्वाधिकं महत्त्वपूर्णः समयः अस्ति। कुल्लू-मनाली, शिमला, धर्मशाला इत्यादिषु क्षेत्रेषु अधिकाः पर्यटकाः अस्मिन्नेव समये आगच्छन्ति, स्थानीय-होटल-व्यवसायिनां भोजनशाला-स्वामिनां च प्रमुखः आयः अपि अस्मिन्नेव समये भवति। ईदृश्यां स्थितौ वाष्प-इन्धनयोः वर्धितानि मूल्यानि सर्वप्रथमं पर्यटन-उद्योगे प्रहारं कृतवन्तः। तेन उक्तं यत् तैल-महार्घतया वाणिज्यिक-वाहनेषु अतिरिक्तः भारः वर्धिष्यते, यस्य प्रभावः निर्माण-सामग्रीषु दैनन्दिन-आवश्यकतायाः वस्तुषु च अपि भविष्यति। सिकता-लोह-एल्युमीनियम-वस्तूनि पूर्वमेव महार्घाणि सन्ति। आयात-शुल्कस्य अन्ताराष्ट्रिय-अवरोधानां च कारणात् मूल्यानि निरन्तरं वर्धन्ते। शाकानि, दुग्धं, खाद्यतैलं, अन्यानि आवश्यकवस्तूनि च महार्घाणि भविष्यन्ति, यतोहि वहन-व्ययस्य (Transport cost) वृद्धेः साक्षात् प्रभावः विपणि-मूल्येषु भवति। अनेन कृषकाणां सामान्योपभोक्तृणां च द्वयोः हानिः भविष्यति। मन्त्रिणा उक्तं यत् देशे अधिकतमः करः (Tarif) वर्धमानः आर्थिक-अनिश्चितता च एकस्याः व्यवस्थितायाः विफलतायाः दिशि सङ्केतं करोति। तेन उक्तं यत् प्रदेशे 'बिटुमिन' (Bitumen/डामर) इत्यस्य वर्धमान-मूल्य-कारणेन संविदाकाराः (Contractors) कार्यं न कुर्वन्ति। प्रदेशे अस्मिन् ऋतौ ५०० तः ६०० किलोमीटर-परिमित-मार्गाणां टारिंगकरणस्य लक्ष्यं स्थापितम् अस्ति। तेन उक्तं यत् दिल्ली-राजस्थान-मध्यप्रदेश-सहित-अनेकेषु राज्येषु अपि अस्मिन् विषये चिन्ता प्रकटीक्रियते। तेन विविध-विभागानां मन्त्रिणां कथनानि पठितानि, येषु एषा समस्या गम्भीरा उक्ता। तेन अभ्यर्थना कृता यत् केन्द्रसर्वकारः अस्मिन् विषये सर्वदलीय-उपवेशनं आह्वयेत्, यतोहि अस्य साक्षात् प्रभावः सामान्यजनतायाम् उपभोक्तृषु च भवति। अन्ताराष्ट्रिय-स्तरे अद्यापि अनिश्चितता वर्तते।



कतिपय-दिनेभ्यः पूर्वं अमेरिका-राष्ट्रपतिः चीनं गतः आसीत् बहूनि उपवेशनानि च अभवन्, किन्तु इरान-युद्धस्य 'होर्मुज'-क्षेत्रस्य च स्थितेः अद्यापि कोऽपि स्थायी समाधानं न जातम्। एषः यद्यपि अन्तर्राष्ट्रिय-विषयः स्यात्, तथापि अस्य प्रभावः हिमाचल-सहित-सम्पूर्णे देशे भवति। पूर्वं केवलम् आशङ्का आसीत्, किन्तु अधुना मूल्यवृद्धेः आर्थिक-प्रभावस्य च प्रभावः जनानां दैनिक-जीवने स्पष्टं दृश्यते। लोकनिर्माणमन्त्रिणा उक्तं यत् न्यूनानां वाहनानाम् उपयोगस्य तथा न्यून-स्वर्ण-क्रयणस्य आह्वानानां प्रभावः लघु-व्यापारिषु अपि भवति। हिमाचलप्रदेशे सहस्रशः स्वर्णकाराः, आभूषण-व्यवसायिनः, कर्मकराः च अस्मिन्नेव व्यवसाये आश्रिताः सन्ति। यदि जनाः स्वर्ण-क्रयणात् निरुत्साहिताः करिष्यन्ते, तर्हि एतेषां परिवाराणाम् आजीविकायां साक्षात् प्रभावः भविष्यति। एते विषयाः राजनैतिक-दृष्टिकोणेन न द्रष्टव्याः, यतोहि एते हिमाचलप्रदेशस्य जनानां व्यापक-हितैः सम्बद्धाः सन्ति। तेन ज्ञापितं यत् मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना अपि अस्मिन् विषये प्रधानमन्त्रिणे पत्रं लिखितं तथा हिमाचलस्य परिस्थितिः विचिन्त्य साहाय्यं दातुं प्रार्थना कृता। राज्यसर्वकारः प्रभावित-व्यापारिभिः स्वर्णकारैः च सह चर्चां करिष्यति तथा च दीर्घकालिक-समाधाने विचारः भविष्यति। लोकतन्त्रस्य मूलम् उद्देश्यम् एतदेव यत् सर्वैः सह निरन्तरं संवादः क्रियेत। राज्यस्तरे या सहायता सम्भवा भविष्यति, तस्याः उपरि मुख्यमन्त्री विचारं करिष्यति, किन्तु बहवः विषयाः राज्यसर्वकारस्य अधिकारात् बहिः सन्ति, एतेषु च अन्तिमः निर्णयः केन्द्रसर्वकारेण प्रधानमन्त्रिणा च करणीयः भविष्यति। देशः पूर्वमेव बेरोजगारी-मूल्यवृद्ध्योः प्रहारं सोढुं प्रभवति, अतः केन्द्रसर्वकारः अस्यां दिशि गम्भीराम् कार्यविधिम् कुर्यात्।

## नगरनिगम-निर्वाचनेषु सकारात्मक-परिणामाः लप्स्यन्ते

नगरनिगम-निर्वाचन-विषये विक्रमादित्यसिंहेन उक्तं यत् मण्डी, धर्मशाला, पालमपुरं, सोलनम् इत्यादिषु स्थानेषु पक्षः पूर्णशक्त्या सह निर्वाचनं प्रतिस्पर्धयति। तेन उक्तं यत् पक्षस्य पर्यवेक्षकैः, मुख्यमन्त्रिणा, प्रभारी-महोदयेन सर्वैः कार्यकर्तृभिः च मिलित्वा काङ्ग्रेस-पक्षस्य सुदृढीकरणाय कार्यं कृतम्, सकारात्मकाः परिणामाः च द्रक्ष्यन्ते। सर्वैः मिलित्वा पक्षाय कार्यं कृतम्, अधुना अस्य परिणामः जनतयैव दातव्यः अस्ति। तस्य उद्देश्यं राजनैतिक-सीमातः उपरि उत्थाय हिमाचलप्रदेशस्य ७५ लक्ष-जनानां ध्वनिं अग्रे प्रेषणम् अस्ति। तेन अङ्कितं यत् लोकनिर्माणविभागेन सम्बद्धेषु अनेकेषु विषयेषु बजट-आनेतुं प्रयासः कृतः। नगर-विकासाय ५४०० कोटि-रूप्यकाणां प्रस्तावाः केन्द्राय प्रेषिताः आसन्, येषु १२०० कोटि-रूप्यकाणां स्वीकृतयः प्राप्ताः।

### नगराणां विकासाय विस्तृत-मार्गचित्रम्

तेन उक्तं यत् सर्वकारेण नगराणां विकासाय विस्तृतं मार्गचित्रं सज्जं कृतम्। अस्मिन् वाहन-स्थानकं (Parking), हाइड्रोलिक-पार्किंग, मलवाहिका-तन्त्रं (Sewerage) तथा अपशिष्ट-निस्तारणम् (Waste disposal) सदृशाः योजनाः सम्मिलिताः सन्ति। हिमालचले वर्धमानेन पर्यटनेन सह अपशिष्टस्य समस्या अपि गम्भीरा सञ्जायते। कुल्लू-मनाली-शिमला-सदृशेशु क्षेत्रेषु प्रतिदिनं सहस्रशः टन्-परिमितः अपशिष्टः उत्पद्यते, यस्य निस्तारणं पर्याप्तं नास्ति। पर्यावरण-रक्षणं सर्वकारस्य प्राथमिकता वर्तते। आगामि-काले प्रदेशस्य विविध-भागेषु स्थापितानां सयन्त्राणां (Plants) क्षमता वर्धयिष्यते। तेन चिन्ता प्रकटीकृता यत् अनेकाः नद्यः क्षतिग्रस्ताः भवन्ति केचन भागाः च जले निमज्जन्ति। यदि समये अस्मिन् ध्यानं न दीयते, तर्हि आगामि-काले 'टाइफाइड'-सदृशानां रोगाणां प्रकरणानां वृद्धिः भवितुं शक्नोति।

## Kashyapa ऋषेः त्रयोदश पत्न्यः

Kashyapa ऋषेः त्रयोदश पत्न्यः आसन्। तासां गर्भेभ्यः देवाः, दानवाः, नागाः, पक्षिणः तथा पृथिव्यां स्थिताः सर्वे जीवाः उत्पन्नाः। अतः काश्यपः एव सर्वेषां मूलपुरुषः तथा गोत्रप्रवर्तकः अभवत्। यस्य कस्यापि गोत्रं न ज्ञायते, तर्हि "काश्यपगोत्रम्" इति उच्चार्यते।

काश्यपपत्नीः तथा वंशः

१. अदितेः गर्भे सर्वे देवा अजायन्त — सूर्यः, इन्द्रः, अर्यमन्, त्वष्टा, सविता, धाता, वरुणः, भगः, अंशः, मित्रः, पूषा तथा वामनः।

२. दितेः गर्भे हिरण्याक्षः, हिरण्यकशिपुः तथा सिंहिका (होलिका) इति राक्षसाः अजायन्त।

३. दनुः शतं दानवानां माता आसीत्। ते सर्वे एव दुष्टाः न आसन्। मयासुरः (वास्तुशिल्पी) तेषां मध्ये एकः आसीत्।

४. अरिष्टा गन्धर्वाणां माता आसीत्। गन्धर्वाः गीतनृत्यकुशलाः आसन्।

५. सुरसा नागानां माता आसीत्।

६. खसा देवतानां माता आसीत्। तेषु देवदानवयोः मिश्रणम् आसीत्। यथा — कुबेरः।

७. सुरभिः गवां महिषीणां च माता आसीत्।

८. विनता अरुणस्य पक्षिराजस्य गरुडस्य च माता आसीत्।

९. तारा नाम्न्याः षट् कन्याः आसन्। तासां गर्भेभ्यः गर्दभः, उष्ट्रः, काकः तथा उलूकः उत्पन्नाः।

१०. क्रोधवशा चतुर्दशसहस्राणाम् असुराणां माता आसीत्।

११. इला नाम्न्याः गर्भेभ्यः वृक्षाः, गुल्माः, पुष्पाणि तथा औषधयः उत्पन्नाः।

१२. कद्रूः शेषः, वासुकिः, तक्षकः तथा नहुषः इत्यादीन् शक्तिशालिनः नागान् अजनयत्।

१३. मुनिः स्वर्गस्थितानाम् अप्सरसां माता आसीत्।..... **सुधा साठये, मुंबई**

sudha_sathaye@yahoo.com



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

बेङ्गलूरुनगरे केनचित् गृहस्वामिना सहसा भाटकवृद्धिः कृता। एषा वार्ता मया श्रुता।

**काव्या-** नमो नमः नन्दिनि। मूल्यवृद्धिः अतीव कष्टप्रदा। अपरपक्षे, अमेरिकादेशे एकया स्त्रिया स्वपतिः हतः, यतः सः तां बहु संरोषितवान् अभूत् इति तया उक्तम्।

**नन्दिनी-** पति-हननम् तु अतीव क्रूरम्। किञ्चित् कोपेन एतादृशं कार्यं न करणीयम्।

अनन्तरं, एकः विचित्रः वृत्तान्तः अस्ति। संस्था-आय-विषये प्रश्नः पृष्टः इति कारणात् अधिकारिणा साक्षात्कारः मध्ये एव त्यक्तः।

**काव्या-** सत्यम्, अधिकारिणः कोपः अयुक्तः अस्ति। प्रश्नैः विना कार्यं कथं शक्यते?

अन्ते च, नूतन-उद्यमं कृतवता केनचित् पुरुषेण पश्चात्तापः प्रकटितः। तेन उक्तं यत् "सर्वैः असत्यं भाषितम्, अत्र स्वतन्त्रता न लब्धा" इति।

# भारतस्य विभाजनस्य विषये अस्माकं मध्ये कतिजनाः जानन्ति?

सुधा साठ्ये मुम्बई
sudha_sathaye@yahoo.com

भारतस्य विभाजनं कियत्वारं जातम्? ब्रिटिश-शासनकाले ६१ वर्षेषु सप्तवारं भारतस्य विभाजनम् अभवत्।

**१) अफगानिस्तानः- १८७६ तमे वर्षे भारतात् पृथक् अभवत्।**
**२) नेपालः- १९०४ तमे वर्षे।**
**३) भूटानम्- १९०६ तमे वर्षे।**
**४) तिब्बतः- १९०७ तमे वर्षे।**
**५) श्रीलङ्का- १९३५ तमे वर्षे।**
**६) म्यानमारदेशः (बर्मा)- १९३७ तमे वर्षे।**
**७) पाकिस्तानः- १९४७ तमे वर्षे।**

## अखण्डभारतस्य विभाजनम्

पूर्वकाले अखण्डभारतं हिमालयात् हिन्द-महासागरपर्यन्तम्, ईरानदेशात् इण्डोनेशियापर्यन्तं विस्तृतम् आसीत्।
१८५७ तमे वर्षे भारतस्य क्षेत्रफलम् ८३ लक्ष-चतुरश्र- किलोमीटर-परिमितम् आसीत्, अधुना तु ३३ लक्ष-चतुरश्र-किलोमीटर-परिमितम् अस्ति। १८५७ तः १९४७ पर्यन्तं काले भारतस्य बहवः भागाः बाह्यशक्तिभिः पृथक्कृताः।

## भारतात् पृथक्कृताः देशाः-

*१) श्रीलङ्का-* ब्रिटिश-शासकैः १९३५ तमे वर्षे श्रीलङ्का भारतात् पृथक्कृता। श्रीलङ्कायाः प्राचीनं नाम "सिंहलद्वीपः" आसीत्। अनन्तरं तस्य नाम "सिलोन" इति कृतम्। सम्राट् अशोकस्य काले श्रीलङ्कायाः नाम "ताम्रपर्णी" इति आसीत्। अशोकस्य पुत्रः महेन्द्रः पुत्री सङ्घमित्रा च बौद्धधर्मस्य प्रचारार्थं श्रीलङ्कां गतवन्तौ। श्रीलङ्का अखण्डभारतस्य भागः आसीत्।

*२) अफगानिस्तानः-* अफगानिस्तानस्य प्राचीनं नाम "उपगणस्थानम्" आसीत्, कन्धारस्य नाम "गान्धारः" आसीत्। अयं देशः शैवधर्मप्रधानः आसीत्। महाभारते वर्णितः गान्धारदेशः अत्रैव स्थितः। कौरवमाता गान्धारी तथा शकुनिः अत्र एव जातौ। १८७६ तमे वर्षे रूसदेशस्य ब्रिटनदेशस्य च मध्ये सन्धिः अभवत्, ततः अनन्तरं अफगानिस्तानः स्वतन्त्रदेशरूपेण स्वीकृतः।

*३) म्यानमारदेशः* (बर्मा)- म्यानमारदेशस्य प्राचीनं नाम "ब्रह्मदेशः" आसीत्। १९३७ तमे वर्षे ब्रिटिशशासकैः अस्य स्वतन्त्रदेशत्वं स्वीकृतम्। प्राचीनकाले हिन्दूराजा आनन्दवर्मा अत्र राज्यं करोति स्म।

*४) नेपालः-* नेपालः प्राचीनकाले "देवगृहः" इति नाम्ना प्रसिद्धः आसीत्। भगवान् बुद्धः लुम्बिनीनगरे जातः, सीतामातुः जन्म जनकपुरे अभवत्, यत् अधुना नेपालदेशे अस्ति। १९०४ तमे वर्षे ब्रिटिश-शासकैः नेपालः स्वतन्त्रदेशः कृतः। सम्राट् अशोकस्य समुद्रगुप्तस्य च काले नेपालः भारतस्य अविभाज्यः भागः आसीत्। १९५१ तमे वर्षे नेपालस्य महाराजा त्रिभुवनसिंहः भारतस्य प्रधानमन्त्रिणं जवाहरलाल नेहरू प्रति नेपालस्य भारते विलयनस्य प्रस्तावं कृतवान्, किन्तु नेहरूमहाशयः तत् अस्वीकृतवान्।

*५) थाईलैण्डदेशः-* थायलण्डदेशः १३९३ पर्यन्तं "स्यामदेशः" इति नाम्ना ज्ञायते स्म। अयोध्या, श्रीविजय इत्यादीनि प्रमुखनगराणि आसन्। अद्यापि अत्र अनेकानि शिवमन्दिराणि दृश्यन्ते। बैंकॉक-नगरे शतानि हिन्दूमन्दिराणि सन्ति।

*६) कम्बोडियादेशः-* "कम्बोडिया" इति नाम संस्कृतस्य "कम्बोज" इत्यस्मात् आगतम्। अयं प्रदेशः अखण्डभारतस्य भागः आसीत्। भारतीयवंशीय- कौण्डिन्य- राजवंशः प्रथमशताब्दीतः अत्र राज्यं कृतवान्। अत्र जनाः शिवं विष्णुं बुद्धं च पूजयन्ति स्म। संस्कृतभाषा राष्ट्रभाषा आसीत्। अद्यापि चैत्र, वैशाख, आषाढ इत्यादयः मासनामानि प्रयुज्यन्ते। विश्वप्रसिद्धम् अङ्कोरवाट- मन्दिरं भगवान् विष्णवे समर्पितम् अस्ति। तस्य भित्तिषु रामायण- महाभारतयोः चित्राणि दृश्यन्ते।

*७) वियतनामदेशः-* वियतनामदेशस्य प्राचीनं नाम "चम्पादेशः" आसीत्। तस्य प्रमुखनगराणि इन्द्रपुरम्, अमरावती, विजय च आसन्। अत्र अद्यापि शिव- लक्ष्मी- पार्वती- सरस्वतीमन्दिराणि दृश्यन्ते। चाम- जनाः मूलतः शैवाः आसन्।

*८) मलेशियादेशः-* मलेशियादेशस्य प्राचीनं नाम "मलयदेशः" आसीत्। "मलय" इति संस्कृतशब्दः पर्वतभूमेः अर्थं ददाति। रामायणे रघुवंशे च अस्य उल्लेखः अस्ति। अत्र शैवधर्मः प्रचलितः आसीत्। दुर्गादेव्याः गणपतेः च पूजा क्रियते स्म। ब्राह्मी लिपिः संस्कृतभाषा च प्रमुखे आस्ताम्।

*९) इण्डोनेशियादेशः-* इण्डोनेशियादेशस्य प्राचीनं नाम "दीपान्तरभारतः" आसीत्। पुराणेषु अपि अस्य उल्लेखः दृश्यते। अत्र हिन्दुराजानां शासनम् आसीत्। जावा-द्वीपे विशालं शिवमन्दिरम् आसीत्। मन्दिरेषु रामस्य कृष्णस्य च मूर्तयः उत्कीर्णाः दृश्यन्ते। इण्डोनेशियादेशस्य अनेकसंस्थानां नामानि सूत्रवाक्यानि च अद्यापि संस्कृते एव सन्ति।


सुधा साठ्ये,मुम्बई

**इण्डोनेशिया-पुलिस-अकादमी - "धर्मविजाक्षणाक्षत्रिय"**
**राष्ट्रियसैन्यदलम्- "त्रिधर्म एककर्म"**
**विमानसेवा- "गरुड एयरलाइन्स"**
**गृहमन्त्रालयः- "चरकभुवन"**
**वित्तमन्त्रालयः- "नगरधनरक्षा"**
**सर्वोच्चन्यायालयः- "धर्मायुक्तिः"**

*१०) तिब्बतः-* तिब्बतस्य प्राचीनं नाम "त्रिविष्टपम्" आसीत्। १९०७ तमे वर्षे चीन-ब्रिटन-सम्झौतया तस्य विभाजनम् अभवत्। १९५४ तमे वर्षे जवाहरलाल नेहरूः तिब्बतं चीनदेशस्य भागरूपेण स्वीकृतवान्। अनन्तरं चीनशासकैः सम्पूर्णः प्रदेशः बलात् अधिगृहीतः।

११) भूटानम्- १९०६ तमे वर्षे ब्रिटिश-शासकैः भूटानं भारतात् पृथक्कृत्य स्वतन्त्रदेशत्वेन स्वीकृतम्। "भूटान" इति शब्दः संस्कृतस्य "भू-उत्थान" इत्यस्मात् निर्मितः, यस्य अर्थः "उच्चभूमिः" इति।

*१२) पाकिस्तानः-* १४ अगस्त् १९४७ तमे वर्षे भारतस्य विभाजनम् अभवत्। पूर्वपाकिस्तानः पश्चिमपाकिस्तानः च निर्मितौ। मोहम्मद- अली- जिन्ना १९४० तः धर्माधारित- स्वतन्त्रदेशस्य याचनां करोति स्म, यः अनन्तरं पाकिस्तानरूपेण अभवत्। १९७१ तमे वर्षे भारतस्य साहाय्येन पुनः पाकिस्तानस्य विभाजनम् अभवत्, ततः बाङ्ग्लादेशः अस्तित्वम् आगतः। पाकिस्तानः बाङ्ग्लादेशः च पूर्वभारतस्य भागौ एव स्तः।

-डॉ विमलेश झा, डीएवी पब्लिक विद्यालयः,बरारी, भागलपुर, बिहार

# सावित्री-सत्यवतोः कथा-

अस्य व्रतस्य प्रमुखाधारः सावित्री-सत्यवतोः कथा अस्ति। प्राचीनकाले अश्वपतिनामकः राजा आसीत्। तस्य कन्या सावित्री अत्यन्तं रूपवती, गुणवती, तेजस्विनी च आसीत्। सा विवाहार्थं योग्यं वरम् अन्वेष्टुं स्वयं निर्गता। तदा सा वनवासिनं सत्यवन्तं दृष्टवती। सत्यवान् धर्मात्मा, सत्यवादी, विनयी च आसीत्। किन्तु देवर्षिः नारदः उक्तवान् यत् सत्यवतः आयुः केवलं एकवर्षपर्यन्तमेव अस्ति। एतत् ज्ञात्वापि सावित्री दृढनिश्चयेन सत्यवन्तमेव पतिरूपेण स्वीकृतवती। विवाहानन्तरं सा पतिसेवायां निरता अभवत्। यदा सत्यवतः मृत्युर्दिनम् आगतं तदा सावित्री उपवासं कृत्वा पतिसहितं वनं गतवती। सत्यवान् काष्ठच्छेदनकाले मूर्छितः भूत्वा भूमौ पतितः। तदा यमः तस्य प्राणान् नेतुम् आगतवान्। सावित्री यमस्य पृष्ठतः गच्छन्ती धर्मयुक्तैः वचनैः तं प्रसन्नं कृतवती। यमः तस्याः पतिव्रतधर्मेण, बुद्ध्या, विनयेन च प्रभावितः अभवत्। अन्ततः सः सावित्र्यै वरान् दत्त्वा सत्यवतः प्राणान् पुनः प्रत्यर्पितवान्। एवं सावित्री स्वपतेः जीवनं पुनः प्राप्तवती। एषा कथा भारतीयनारीणां धैर्यस्य, श्रद्धायाः, निष्ठायाः, बुद्धेः च अद्भुतम् उदाहरणम् अस्ति। वटसावित्रीव्रतस्य आचरणम् अत्यन्तं श्रद्धापूर्वकं क्रियते। स्त्रियः प्रातःकाले स्नानं कृत्वा नूतनवस्त्राणि धारयन्ति। ततो देवपूजनं कृत्वा वटवृक्षस्य समीपं गच्छन्ति। तत्र रोली, अक्षत, पुष्प, फल, धूप, दीप, नैवेद्यादिभिः वटवृक्षस्य पूजनं कुर्वन्ति। वटवृक्षे सूतबन्धनं कृत्वा परिक्रमा क्रियते। ततः सावित्री- सत्यवन्तं कथा श्रूयते। कुत्रचित् प्रदेशेषु स्त्रियः निर्जलोपवासमपि कुर्वन्ति। सायंकाले ब्राह्मणभोजनं, दानं च कृत्वा व्रतस्य पारणं क्रियते। व्रतस्य मुख्यभावः श्रद्धा, संयमः, पतिसेवा, परिवारनिष्ठा च अस्ति। एतत् व्रतं केवलं धार्मिकक्रिया न, अपि तु सामाजिकदृष्ट्यापि महत्त्वपूर्णम् अस्ति। एतेन पारिवारिकसौहार्दं सुदृढं भवति। स्त्रियः स्वपरिवारस्य मङ्गलं चिन्तयन्ति। व्रतसमये ग्रामेषु नगरेषु च स्त्रियः एकत्र समागत्य पूजां कुर्वन्ति, येन सामाजिकैक्यं वर्धते। अस्मिन् व्रते पतिव्रतधर्मस्य महत्त्वं प्रतिपाद्यते। परन्तु अस्य तात्पर्यं केवलं पतिपूजा न, अपि तु पारस्परिकविश्वासः, प्रेम, त्यागः, सहनशीलता च अस्ति। आधुनिकसमाजे यदा पारिवारिकसम्बन्धाः दुर्बलाः भवन्ति, तदा एतादृशानि व्रतानि नैतिकमूल्यानां संरक्षणे सहायकानि भवन्ति। भारतीयसंस्कृतिः उत्सवानां, व्रतानां, पर्वाणां च संस्कृतिः अस्ति। वटसावित्रीव्रतं भारतीयनारीणां सांस्कृतिकचेतनायाः जागरणं कारयति। अस्य माध्यमेन पौराणिककथानां ज्ञानम् अग्रिमवंशे सञ्चरति। बालकाः अपि एतादृशेषु अवसरेषु भारतीयपरम्परायाः शिक्षां लभन्ते।
वटवृक्षस्य पूजनं पर्यावरणसंरक्षणस्य अपि सन्देशं ददाति। भारतीयपरम्परायां वृक्षपूजनस्य परम्परा प्रकृतिसंरक्षणस्य वैज्ञानिकदृष्टिकोणस्य द्योतिका अस्ति। वटवृक्षः प्राणवायोः प्रमुखः स्रोतः अस्ति। अतः अस्य संरक्षणं मानवजीवनाय आवश्यकम् अस्ति। आध्यात्मिकदृष्ट्या अपि व्रतस्य महत्त्वम् अस्ति। व्रतस्य मूलम् आत्मसंयमः अस्ति। उपवासेन मनसः शुद्धिः भवति। श्रद्धया पूजनं कृत्वा मानवः आत्मिकशान्तिं प्राप्नोति। सावित्र्याः कथा धर्मस्य विजयम्, सत्यस्य महत्त्वं, श्रद्धायाः प्रभावं च प्रतिपादयति। यमराजोऽपि धर्मयुक्तवचनैः प्रभावितः अभवत्- एतत् दर्शयति यत् सत्यं धर्मश्च सर्वदा विजयी भवतः। अद्यतनकाले केचन जनाः व्रतानि केवलं रूढिवादस्य प्रतीकः इति मन्यन्ते। किन्तु यदि तेन एतस्य व्रतस्य आन्तरिकतत्त्वं ज्ञायते तर्हि ज्ञायते यत् एतानि व्रतानि मानवजीवनम् अनुशासितं, संयमितं, संस्कारयुक्तं च कुर्वन्ति। वटसावित्रीव्रतस्य प्रमुखसन्देशः अस्ति- निष्ठा, प्रेम, धैर्यं, परिवारस्य प्रति समर्पणम् च। आधुनिकनारी शिक्षिता, स्वावलम्बिनी च अस्ति, किन्तु तस्याः जीवने अपि पारिवारिकमूल्यानां महत्त्वं न्यूनं नास्ति। सावित्री न केवलं पतिव्रता आसीत्, अपि तु सा बुद्धिमती, धैर्यशालिनी, निर्णायकशक्तिसम्पन्ना च आसीत्। अतः सावित्री आधुनिकनारीणामपि प्रेरणास्रोतः अस्ति।
वटसावित्रीव्रते अनेकानि नैतिकमूल्यानि अन्तर्निहितानि सन्ति।
**निष्ठा-** सावित्री स्वनिर्णये दृढा आसीत्।
**धैर्यम्-** विपत्तौ अपि सा विचलिता न अभवत्।
**बुद्धिमत्ता-** यमेन सह संवादे तस्याः प्रज्ञा दृश्यते।
कर्तव्यपरायणता- सा पतिसेवायां सदा तत्परा आसीत्।
**धर्मनिष्ठा-** सावित्री धर्ममार्गात् कदापि न विचलिता।